ISSN: 2249-894X IMPACT FACTOR : 5.2331(UIF) VOLUME - 6 | ISSUE - 11 | AUGUST - 2017

REVIEW OF RESEARCH

# ज्यौतिषशास्त्रदृष्ट्या भूगोलविमर्शः



राम बाबू राय
संस्कृत विभाग, आर.बी.एस. महाविद्यालय, तियाई.

**प्रस्तावना :**

ज्योतींषि प्रतिपाद्यन्ते यस्मिन्नित्यर्थे ''अर्शआदिभ्योऽच्'' [5/2/127] इति सूत्रेण ज्योतिषशब्दो निष्पद्यते, यद्वा द्योतन्ते प्रकाशन्ते ग्रहनक्षत्रादीन्यनेनेत्यर्थे 'द्युतेरिषन्नादेश्च जः' इत्युणादिसूत्रेण ज्योतिषशब्दस्य निष्पत्तिर्भवति। अनेन सिद्धं यद् ग्रहनक्षत्राणां गतिस्थितिमितिमधिकृत्य कृतं शास्त्रं ज्योतिषशास्त्रमित्युच्यते। ज्योतिषशास्त्रस्यैकाऽन्याऽपि व्युत्पत्तिर्वर्तते- 'ज्योतिषां सूर्यादिग्रहाणां बोधकं शास्त्रम्' इति। तात्पर्योऽयं वर्त्तते यद् यस्मिन् शास्त्रे सूर्यादिग्रहाणां गतिसम्बन्धिनः सर्वेनियमाः प्रतिपाद्यन्ते तथा च तेषां ग्रहाणां भौतिकपदार्थेषु यत् प्रभावो भवति, तस्य यत्र वैज्ञानिकरीत्या विवेचनं विविच्यते तच्छास्त्रं ज्योतिषशास्त्रमिति। यतो हि वेदा यज्ञकर्मप्रवृत्ताः यज्ञाश्च 'वसन्ते ज्योतिषा यजेत' 'पौर्णमास्यां यजेत' इत्यादिश्रुतिवाक्यैस्ते कालाधीनाः । यतो ह्यस्माच्छास्त्रात् कालबोधो भवति, अतोऽस्य शास्त्रस्य वेदाङ्गत्वमुक्तम्। ज्यौतिषशास्त्रमिदं यतो वेदस्य चक्षुरित्य- भिधीयतेऽतोऽङ्गमध्येऽस्य प्राधान्यमङ्गीक्रियते। यथोक्तं भास्करेण -

**वेदास्तावद्यज्ञकर्मप्रवृत्ता**
**यज्ञाः प्रोक्तास्ते तु कालाश्रयेण ।**
**शास्त्रादस्मात् कालबोधो यतः स्या -**
**द्वेदाङ्गत्वं ज्यौतिषस्योक्तमस्मात् ॥**
**शब्दशास्त्रं मुखं ज्यौतिषं चक्षुषी**
**श्रोत्तमुक्तं निरुक्तं च कल्पः करौ ।**
**या तु शिक्षाऽस्य वेदस्य सा नासिका**
**पादपद्मद्वयं छन्द आद्यैर्बुधैः ॥**
**वेदचक्षुः किलेदं स्मृतं ज्यौतिषं**
**मुख्यता चाङ्गमध्येऽस्य तेनोच्यते ।**
**संयुतोऽपीतरैः कर्णनासादिभि-**
**श्वक्षुषाङ्गेन हीनो न किंचित्करः ॥**

इत्थं वयं पश्यामो यज्जौतिषशास्त्रे प्रत्यक्षादीनां प्रामाण्यत्वादनेन शास्त्रेण यस्मिन् दिने ग्रहणादीनां या भविष्यवाणी विधीयते सा प्रत्यक्षरूपेण दृश्यते, अतोऽत्राऽन्यवेदा- ङ्गशास्त्रवत् तादृशो विवादो नोत्पद्यते। अत एव वेदाङ्गशास्त्रेषु ज्यौतिषशास्त्रस्य प्राधाान्यमङ्गीक्रियते।

भातीयचिन्तनपरमपरायां सर्वेषां शास्त्राणामाधारः वेदा एवेति सर्वविदितं वर्त्तते । समग्रं ज्ञानं वैदिक-साहित्येषु निहितमस्तीति मन्यते विद्वद्भिः यतो हि ''**विद्ज्ञाने**'' धातुना वेद शब्दो निष्पन्नो भवति। सम्प्रत्य नुसंधानमाध्यमेन यद्ज्ञानम्भवति तत् सर्वं न्यूनाधिकरूपेण वैदिकसाहित्येषूपलभ्यते। वस्तुतस्त्वस्मिञ्जगति किमपि तत्त्वमेतादृशन्नास्ति यत् वेदे सन्निहितन्न भवेत् । यदा मनुनोक्तम् ''भूतं भव्यं भविष्यं च सर्वं वेदात्प्रसिध्यति'' इति

तत्र क्रमशः भूर्भुवस्वमहजनतपसत्योर्ध्वलोका अतलवितलसुतलतलातलरसातल- महातलपातालाख्या अधोलोका इति चतुर्दशलोकाः सन्तीति । के सन्ति? कुत्र चेमे लोकास्तथा च कथं सूर्यस्य चन्द्रस्य ताराणां ग्रहाणां भुवोऽन्तरिक्षस्योत्पतिर्जातेतिमहान् वितर्कः समुत्पद्यते । प्रसङ्गेऽस्मिन् वैदिकसाहित्ये नानाविधा विचाराः दृश्यन्ते । वेदेषु चतुर्दश लोकानां स्थितिः पुराणानामनुसारन्नास्ति। तत्र तु द्यु-अन्तरिक्ष-पृथिवीनाञ्च पृथग्-पृथग्रूपेण विवेचनं वर्त्तते । तैत्तिरीयब्राह्मणस्यैकस्मिन् प्रसङ्गे पूर्वञ्जलमासीत्तदनन्तरञ्च पृथिवी समुत्पन्नेति वर्णनं मिलति । तैतिरीयसंहितायामुदकस्यानन्तरं वायोस्तदनन्तरम्भुव- श्चोत्पत्तिरिति । अस्मात् पूर्वमपि वेदेषु वर्ण्यते यदादौ न सदासीन्नासदासीदिति ।

अस्य भावोऽस्ति यदयं विश्वः पूर्वमन्धकारमय आसीत्। तत्रान्धकारेऽपां तेजोमय एकः सुवर्णस्याण्ड उत्पन्नोऽभूत्। अयं भगद्वये विभक्तौ भूत्वा स्वर्गपृथिवीरूपावभव- तामिति। केचन जनाः कथयन्ति यदाद्यावस्था सलिलावस्थासीदिति। अत्र सलिलः आपोऽस्ति अर्थात् परमाणोरद्यावस्था। ''आपः'' शब्दस्यार्थः कदापि जलन्न करणीयम्, केचनजनाः कुर्वन्ति। सलिलावस्थानन्तरमज्ञानोपहित- चैतन्यादाकाशः, आकाशाद्वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथ्वीचोत्पद्यते। एतादृशाः विचारा प्रायः भारतीयदर्शनशास्त्रेषु सर्वत्र दृश्यन्ते। तत्र वर्णित सुवर्णाण्डस्याभिप्रायस्तेजसोऽवस्थास्तीति यतो हि सुवर्णसदृशं वर्णः यदा तेजसो भवति तदैव विस्फोटो जायते। सदा प्रत्येकं सृष्ट्यादावेतादृशी स्थितिः भवति। इयं स्थिति आधुनिका वैज्ञानिका ''बिंग बैंग'' इति नामना स्वीकुर्वन्ति। अत्रविचारणीयः विषयोऽस्ति यदेतादृशी स्थितिः कथं समुत्पन्नेति समाधाने बहुकालादा- धुनिका वैज्ञानिका शोधकार्ये संलग्नाः सन्ति। इदानीं यावदस्य समाधानं न जातमिति किन्तु वैदिकवाङ्मयेऽस्य समाधानं दृश्यते। तत्र ऋग्वेदे वर्णनं मिलति यत् सृष्ट्यारम्भः महाग्निकाण्डेन भवति। अस्य काण्डस्य करणमीश्वरस्य वज्रपातोऽस्ति। अस्य वज्रपातस्याभिप्राय ऊर्जाणान्नियोजितसंघर्षोऽस्ति। अद्य यदि वेदाध्ययनं वैज्ञानिकदृष्ट्या भवेत्तर्हि परमाद्भुतरहस्यानमुद्घाटनम्भविष्यतीति। पुनः जिज्ञासा भवति यदस्माकं सौरपरिवारे सर्वे ग्रहोपग्रहाश्च सूर्यस्य प्रकाशेन प्रकाशिता भवन्ति । सूर्यस्य महत्वमस्माकङ्कृते कथम्? कीदृशञ्चास्तीति सर्वे जानन्ति। यदि सूर्ये प्रकाशः न स्यात्तर्हि जीवनस्य सम्भावना भविष्यति न वेति महत्वपूर्णः प्रश्नः। प्राच्यप्रतीच्योभयदृष्ट्या सूर्य एवास्माकञ्जीवनमस्तीति स्पष्टमेव परन्त्वस्माकं सौरपरिवारे केवलज्जीवनम्भूमौ एवेति। सूर्यस्य प्रकाशेन तु सर्वे ग्रहाः प्रकाशिताः भवन्ति सूर्यञ्च परितः परिभ्रमन्तीति तथाऽपि केवलं भूमावेव जीवनम्। सूर्यस्य प्रकाशेन प्रकाशिताः भूत्वापि ग्रहाणां गुणधर्मिता तथैव नास्ति, अत्र को हेतुः? एतादृशानां सर्वेषां प्रश्नानां समाधानमपि वैदिकसाहित्येष्वोप- लभ्यते ।

**संदर्भ :**

1.सि०शि०, म०अ०, का०मा०अ०, 9-11श्लो०, पृ०सं०- 10

2.उणादिरत्नाकौमुदी, पृ०सं०-661